Set - A

# MT EDUCARE LTD.

**QUEST- I (Semi Prelim - II)**
**2018 - 19**

**CBSE - X**

**PORTION : Ch. 7-11, FULL GRAMMAR**

**Roll No.** | | | | | | | |

**Code No. 52/1**

**Series LRH/1**

| | | | |
|---|---|---|---|
| • खण्डः क | : | अपठितांश-अवबोधनम् | 10 अङ्काः |
| • खण्डः ख | : | रचनात्मककार्यम् | 15 अङ्काः |
| • खण्डः ग | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| • खण्डः घ | : | पठित-अवबोधनम् | 30 अङ्काः |

***Time allowed*** **:** 3 hours ***Maximum Marks*** **:** 80

## COMMUNICATIVE SANSKRIT

**General Instructions :**

(i) The question paper has four sections.

(ii) The answers have to be written in a separate answer-sheet.

(iii) The answers to each section must be written in a serial at one place.

(iv) Don't write answers in the question paper.

(v) Write the question number according to the question paper.

(vi) Answer all the questions in **Sanskrit**.

## खण्डः 'क'
## अपठितांश - अवबोधनम्

**Q.1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**

आसीत् माधवपुरं नाम किञ्चन नगरम् । कलाप्रियः नाम भूपतिः तत्र शासनं करोति स्म । यद्यपि सर्वा : कलाः तस्य प्रियाः तथापि चित्रकलायां विशेषानुरागः । विविधदेशेभ्यः कुशलचित्रकाराः तमागच्छन्ति स्म । राजा तेभ्यः विपुलं धनं यच्छति स्म । राज्ञः गुणज्ञतया उदारतया च ते अतीव सन्तुष्टाः भवन्ति स्म । धनलुब्धः नाम तस्य राज्ञः कश्चन द्‌वारपालः अवर्तत । सः मनसि अकरोत् ''अहमेव चित्रकारानेतान् राजसभां प्रवेशयामि । तेनैव ते विपुलं धनं विन्दन्ते । तर्हि मयापि तेभ्यः धनं लब्धव्यम्'' इति । एवं विचिन्त्य स सर्वान् चित्रकारान् पारितोषिकस्यार्धं याचितुं प्रारभत । केचन स्वेच्छया, केचन अनिच्छया तस्मै धनं यच्छन्ति स्म, यतः तस्य अनुज्ञां विना राजदर्शनमशक्यमेवासीत् ।

**अ) एकपदेन उत्तरत । (केवलं ४)** **[2]**

(i) कस्यां कलायां कलाप्रियस्य विशेषानुरागः ?
(ii) कलाप्रियः कुत्र शासनं करोति स्म ?
(iii) द्वारपालस्य नाम किम् ?
(iv) विविधदेशेभ्यः के तम् आगच्छन्ति स्म ?
(v) द्वारपालस्य अनुज्ञां विना किम् अशक्यमेव आसीत् ?

**ब) पूर्णवाक्येन उत्तरत । (केवलं २)** **[4]**

(i) चित्रकाराः केन सन्तुष्टाः भवन्ति ?
(ii) द्वारपालः मनसि किम् अकरोत् ?
(iii) द्वारपालः किं कर्तुं प्रारभत ?

**स) यथानिर्देशम् उत्तरत । (केवलं ४)** **[2]**

(i) 'पार्थिवः' इत्यर्थे पर्यायपदं किं प्रयुक्तम् ?
(अ) स्नेहः (ब) औदार्यम् (क) भूपतिः

(ii) 'कार्पण्यम्' इति पदस्य विलोमपदं किम् ?
(अ) स्वेच्छा (ब) उदारता (क) अप्रियः

(iii) ........... अतीव सन्तुष्टाः भवन्ति स्म । उचितं पदं चित्वा रिक्तस्थानपूर्तिं कुरुत ।
(अ) चित्रकाराः (ब) द्वारपालः (क) चित्रकारः

(iv) 'राजा तेभ्यः विपुलं धनं यच्छति स्म ।' अस्मिन् वाक्ये 'तेभ्यः' इति सर्वनामपदस्थाने संज्ञापदं किं भविष्यति ?
(अ) चित्रकारस्य (ब) द्वारपालः (क) चित्रकारेभ्यः

(v) 'प्रवेशयामि' इति पदस्य कर्तृपदं किम् ?
(अ) अहम् (ब) भूपतिः (क) द्‌वारपालः

द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **[2]**

## खण्डः 'ख'
## रचनात्मकं कार्यम्

**Q.2. दिनचर्यायै पुत्रं प्रति पित्रा लिखिते पत्रे रिक्तस्थानपूर्तिं कुरुत पत्रं च उत्तरपुस्तिकायां पुनः लिखत । [5]**

चण्डीगढ़तः
दिनाङ्कः १२/५/२०१८
प्रिय पुत्र सुशान्त !
(१) ......
भवतः पत्रेण ज्ञातं यत् एकादश-कक्षायां विज्ञान-विषयस्य चयनं कृत्वा अति (२) ...... करोति । इति शोभनं, परम् अहं भवतः स्वास्थ्याय (३) ...... अस्मि । शरीरम् एव सर्वकार्याणि (४) ...... साधनम् अस्ति । भवान् प्रतिदिनं व्यायामं योगासनं च स्वदिनचर्यायां सम्मिलितं कुर्यात् । पठनेन सह (५) ..... अपि तस्यां स्थानं भवेत् । नित्यं समाचारपत्रस्य पठनं ज्ञानवर्धनाय आवश्यकम् । प्रतिदिनं विषयस्य अध्ययनेन अभ्यासेन च (६) ..... विद्यार्थी व्यग्रः न भवति । एतदर्थं भवतः (७) ..... समुचिता स्यात् । समये जागरणं समये च (८) ..... आवश्यकम् । कार्याणि अनेकानि परम् उचिता समय-व्यवस्था एतानि सर्वाणि कार्याणि (९)...... शक्नोति । ईश्वरः भवतः कल्याणं कुर्यात् इति प्रार्थये ।
भवतः पिता,
(१०) .....

**मञ्जूषा** - | मञ्जूषा - पूरयितुम्, आशिर्वाद, परीक्षा-समये, परिश्रमम्, समय-सारिण, चिन्तितः, क्रीडायाः, साधयितुम्, शयनम्, उमाशङ्करः |

**Q.3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत । [10]**



**मञ्जूषा :** | ददाति, गृह्णति, नयति, विक्रीणीते, स्वीकरोति, वहति, पचति |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।**

'मम प्रियः कविः' इत्यस्मिन् विषये मञ्जूषायाः सहायतया सरलसंस्कृते पञ्चवाक्यानि लिखत ।

**मञ्जूषा -** कालिदासः, सप्तरचनाः, श्रेष्ठं, राजसभायाः, शेक्सपियरः, सुरक्षिता, विक्रमादित्यस्य, कविः

**खण्डः 'ग'**

**अनुप्रयुक्तव्याकरणम्**

**Q.4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत । (केवलं ४)** **[4]**

(i) अर्वाचिनमहाराष्ट्रस्य **भाग्यरेषा + एव** अस्ति ।

(ii) **जगत् + शिवाणि** भवेयुः ।

(iii) सोमशर्मा नाम **धनिको वणिग्** आसीत् ।

(iv) जयद्रथः तु **धनुर्धरैराच्छादितः** ।

(v) दिल्लीनगरे **षट् + मासाः** तु उष्णाः भवन्ति ।

**Q.5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं ४)** **[4]**

(i) वने **पशुपक्षिणः** निवसन्ति ।
(अ) पश्वः पक्षिणः (ब) पशवः च पक्षिणः च
(क) पशुच पक्षी च

(ii) गीता **स्नेहेन सहितं** छात्रान् पाठयति ।
(अ) स्नेहसहितम् (ब) स्नेहसह
(क) सस्नेहम्

(iii) वयं **दुग्धधवलानि** वस्त्राणि धारयामः ।
(अ) दुग्ध इव धवलानि (ब) दुग्धा इव धवलानि
(क) दुग्धम् इव धवलानि

(iv) एकलव्यः **धनुर्विद्यायां पारङ्गतः** आसीत् ।
(अ) धनुर्विद्यापारङ्गतः (ब) धनुर्विद्यापारङ्गता
(क) धनुर्विद्यापारङ्गतम्

(v) **पीताम्बरः** हरिः क्षीरसागरे शेते ।
(अ) पीतम् अम्बरं यस्य सः (ब) पीतम् अम्बरा यस्य सः
(क) पीतानि अम्बराणि यस्याः सा

**Q.6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत । (केवलं ४)** **[4]**

(i) वाचि **अवक्रता** भवेत् ।
(अ) अवक् + तल् (ब) अवक्रत + टाप् (क) अवक्र + टाप्

(ii) बालाः तीव्रं **धाव् + शतृ** गच्छन्ति ।
(अ) धावन्ताः (ब) धावन् (क) धावन्तः

(iii) सैनिकैः दुष्टाः **दण्ड् + अनीयर्** ।
(अ) दण्डनीयाः (ब) दण्डनीयः (क) दण्डनीयम्

(iv) **बुद्धि + मतुप्** जनाः विचारशीलाः भवन्ति ।
(अ) बुद्धिमान् (ब) बुद्धिमती (क) बुद्धिमन्तः

(v) सभ्यैः उच्चैः न **हस् + तव्यत्** ।
(अ) हसितव्यः (ब) हसितव्याः (क) हसितव्यम्

**Q.7. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत ।** **[3]**

शिक्षकः - अमन ! गत्वा पश्य (i) .......... किं कुर्वन्ति ?
अमनः - छात्रैः तु ii) .......... लिख्यते ।
शिक्षकः - किं त्वं लेखं iii) .......... ?

**मञ्जूषा** - | लिखसि, छात्राः, लेखः |

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत ।**

(i) त्वम् उद्यानं कदा गच्छसि ?
(ii) कृष्णेन माता पूज्यते ।
(iii) श्यामः जलं पिबति ।

**Q.8. एतेषु वाक्येषु अङ्कानां स्थाने कालबोधकशब्दाः लिखत । (केवलं ४)** **[2]**

दूरदर्शनस्य समाचाराणां समयसारिणी ।

(i) 'हिन्दी' समाचाराः प्रातः (८.३०) ........... वादने प्रसार्यन्ते ।
(ii) 'संस्कृत' समाचाराः प्रातः (१०.१५) ........... वादने प्रसार्यन्ते ।
(iii) 'आङ्ग्ल' समाचाराः प्रातः (१०.४५) ........... वादने प्रसार्यन्ते ।
(iv) 'मराठी' समाचाराः मध्याह्ने (१२.००) ........... वादने प्रसार्यन्ते ।
(v) 'उर्दू' समाचाराः मध्याह्ने (१२.३०) ........... वादने प्रसार्यन्ते ।

**Q.9. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत। (केवलं ४)** **[4]**

(i) अहम् ........... सर्वत्र सुलभः ।

(ii) तस्मात् प्राणेभ्यः ........... सदाचारः विशेषतः रक्षेत् ।

(iii) ........... तव पुत्राः वीरगतिम् एव प्राप्ताः ।

(iv) ........... अनेके प्रमुखोत्सवाः ।

(v) अहं ........... कालः ।

**मञ्जूषा** - खलु, एव, अत्र, अपि, नूनम्

**Q.10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत। (केवलं ४)** **[4]**

(i) त्वं कदा नाटकं **द्रक्ष्यन्ति** ?

(ii) वृक्षात् **अनेके** पत्राणि पतन्ति ।

(iii) **तस्मिन्** निशायां मम गृहे चौरः आगच्छत् ।

(iv) तव गृहं कः **आगमिष्यसि** ?

(v) युवां किमर्थम् **अहसत** ?

## खण्डः 'घ'

## पठित - अवबोधनम्

**Q.11. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

पर्यटनाधिकारी - ''साधु पृष्टम् ।'' अत्र अनेके प्रमुखोत्सवाः । 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति । एतत् तु 'फरवरी' इति मासे मान्यते । अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिककार्यं क्रियते । 'मोपिन' इति अपि कृषिपर्व अस्ति । देवानामपि देवः 'मोपिन' इति कथ्यते । 'होली' सदृशम् एव पर्व इदम् । जनाः परस्परं मुखे कपोले च शालिचूर्ण लिम्पन्ति । इदम् 'अप्रैल' इति मासे मान्यते । 'ओणम् पर्वसमं 'साङ्केन' एकम् अन्यत् पर्व अस्ति । लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते ।

**अ) एकपदेन उत्तरत। (केवलं २)** **[2]**

(i) 'वाङ्चो' जनजातीनां पर्व किम् ?

(ii) 'लोसर' कस्य प्रमुखं पर्व ?

(iii) 'मोपिन' पर्व कदा मान्यते ?

**ब) पूर्णवाक्येन उत्तरत। (केवलं १)** **[2]**

(i) 'मोपिन' इति पर्वणि जनाः किं कुर्वन्ति ?

(ii) ओणं पर्व समम् अन्यत् किं पर्व अस्ति ?

**स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (केवलं ४)** **[2]**

(i) 'उचितम्' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
(अ) सदृशम् (ब) समम् (क) साधु

(ii) 'असुरः' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?
(अ) जनः (ब) देवः (क) साधु

(iii) 'पृष्टम्' पदे कः प्रत्ययः प्रयुक्तः ?
(अ) क्त (ब) क्तवतु (क) क्त्वा

(iv) 'आयोज्यते' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् अस्ति ?
(अ) सम्पद्यते (ब) इति (क) अस्ति

(v) 'पर्व' इति पदस्य कृते किं विशेषणं गद्यांशे प्रयुक्तम् ?
(अ) अस्ति (ब) जनजातीनाम् (क) प्रमुखम्

**Q.12. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ।।

**अ) एकपदेन उत्तरत। (केवलं २)** **[2]**

(i) प्राणेभ्योऽपि विशेषतः कः रक्षणीयः ?
(ii) श्लोके अव्ययपदं किम् ?
(iii) आचारः कतमः धर्मः ?

**ब) पूर्णवाक्येन उत्तरत। (केवलं १)** **[2]**

(i) विदुषां वचः किम् ?
(ii) कस्मात् सदाचारः विशेषतः रक्षेत् ?

**स) निर्देशानुसारम् उत्तरत। (केवलं ४)** **[2]**

(i) 'धर्मः' इति पदस्य विशेषणपदं किम् ?
(अ) प्रथमः (ब) वचः (क) विशेषतः

(ii) 'अतः' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
(अ) तस्मात् (ब) इति (क) एतत्

(iii) 'बुद्धिमताम्' इति पदस्य कृते किं पर्यायपदं पद्यांशे प्रयुक्तम् ?
(अ) सदाचारः (ब) विदुषाम् (क) प्रथमः

(iv) 'दुराचारः' इति पदस्य कृते किं विलोमपदं पद्यांशे प्रयुक्तम् ?
(अ) सदाचारः (ब) प्राणेभ्यः (क) रक्षेत्

(v) 'प्राणेभ्योऽपि' सन्धिविग्रहं कुरुत ।
(अ) प्राणेभ्यो + पि (ब) प्राणेभ्यः + ऽपि (क) प्राणेभ्यः + अपि

**Q.13. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत ।**

| | | |
|---|---|---|
| राजहंसः | - | अये किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशः 'का का' शब्दैः वातावरणम् आकुलीक्रियते ।'' |
| राजहंसी | - | भर्तः । काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः कृष्णः कर्म अपि कृष्णम् । मेध्यम् अमेध्यं सर्वमेव भक्षयति कर्णकटुशब्दैः ...... । |
| काकः | - | (प्रविश्य सक्रोधम् ।) आः किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः, तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे ? अहं तु अतीवकर्तव्यपरायणः । प्रभाते 'का का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि ।'' |

**अ) एकपदेन उत्तरत । (केवलं २)** **[2]**
(i) सरस्तीरे कः विहरति स्म ?
(ii) कः अतीवकर्तव्यपरायणः ?
(iii) कैः शब्दैः वातावरणम् आकुलीक्रियते ?

**ब) पूर्णवाक्येन उत्तरत । (केवलं १)** **[2]**
(i) कस्य वर्णः कृष्णः ?
(ii) काकः किं भक्षयति ?

**स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । (केवलं ४)** **[2]**
(i) 'अहं तु अतीवकर्तव्यपरायणः' अत्र 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(अ) राजहंसाय (ब) काकाय (क) श्रीरामाय

(ii) 'भक्षयति' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?
(अ) राजहंसी (ब) राजहंसः (क) काकः

(iii) 'श्वेतः' अस्य पदस्य नाट्यांशे किम् विलोमपदं प्रयुक्तम् ?
(अ) कृष्णः (ब) कृष्णम् (क) श्याम

(iv) 'सुप्तान्' इति पदे का विभक्तिः प्रयुक्ता ?
(अ) द्वितीया (ब) तृतीया (क) चतुर्थी

(v) 'खादति' इति पदस्य कृते किं पर्यायपदं गद्यांशे प्रयुक्तम् ?
(अ) आकुलीक्रियते (ब) भक्षयति (क) भवती

**Q.14. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं ४)** **[4]**

(i) **पिकः** कां कथयति त्वं कटु क्वणसि ।
(ii) अरुणाचले **दर्शनीयानि** स्थलानि सन्ति ।
(iii) **ब्राह्मणः** आयुः शतं वर्षाणि ।
(iv) '**लोहितजनपदे** अनेकबौद्धविहाराः सन्ति ।'
(v) काकपिकयोः भेदः **वसन्तसमये** ज्ञायते ।

**Q.15. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत ।** **[4]**

(i) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।

**अन्वय :** पिता (i) ........... बाल्ये (ii) ........... विद्याधनं यच्छति । अस्य (पुत्रस्य) पिता किं (iii) ........... तेपे इति उक्तिः (iv) ........... ।

(ii) सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ।।

**अन्वय :** सर्वः (i) ........... तरतु, सर्वः (ii) ........... पश्यतु । सर्वः (iii) ........... अवाप्नोतु, सर्वः (iv) ........... नन्दतु ।

**मञ्जूषा** - सर्वत्र, पुत्राय, दुर्गाणि, तत्कृतज्ञता, कामान् तपः, भद्राणि, महत्

**Q.16. अधोलिखितानां कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत । (केवलं ४)** **[4]**

(i) सरस्तीरम् ! समयः - **प्रभातवेला** ।
(अ) सायङ्कालः (ब) प्रातःकालः (क) रात्रिः

(ii) अहं खलु **कालः** ।
(अ) समयः (ब) विश्वम् (क) आयुः

(iii) सः **सव्येन पाणिना** चक्रं गृहीतवान् ।
(अ) दक्षिणहस्तेन (ब) हस्तेन (क) वामहस्तेन

(iv) अस्य प्रदेशस्य दर्शनीयस्थलानां दर्शनाय विशेषः **प्रबन्धः** अपि अस्ति ।
(अ) प्रसिद्धः (ब) व्यवस्था (क) अधुना

(v) यः **परुषाः** वाचम् अभ्युदीरयेत् ।
(अ) कठोराम् (ब) धर्मयुक्ताम् (क) विमूढधीः

*All the Best*